# केन्द्रीयसंस्कृतविश्वविद्यालयः

संसदः अधिनियमेन स्थापितः

( प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः, भारतसर्वकारस्य शिक्षामन्त्रालयाधीनः )


## भारतीयज्ञानपरम्परा – शोधसम्भावनाः

### कार्यशालायाः चतुर्थं दिनम् (25-11-2023)

## छन्दःशास्त्रे भारतीयज्ञानपरम्परायाः स्रोतः वर्तते




वेदाङ्गानाम् अध्येतारः न्यूनाः संवृत्ताः। तत्रापि छन्दःशास्त्रम् अधिकृत्य नैव पठन्ति न वा गवेषयन्ति। अतः एतद्विषये शोधच्छात्रैः ध्यानं देयम्। केवलम् अनुष्टुप् छन्दसः अनन्ताः भेदाः भवितुमर्हन्ति। केवलं चतुर्णामेव प्रयोगः क्रियते। अतः अनुसन्धानार्थम् अत्र अनल्पाः अवसराः सन्ति। पिङ्गलाचार्यकृतानि छन्दःसूत्राणि अवश्यं विश्लेषणीयानि। प्रथमे अध्याये पञ्चदश सूत्राणि सन्ति। किम् एतानि गुरुलघुज्ञापकमात्राणि एव ??? न हि । धीश्रीस्त्रीम् इत्यस्य आद्यस्य सूत्रस्य धीरेव श्रीः यस्याः सा धीश्रीस्त्रीः ताम् धीश्रीस्त्रीम् इत्येवं व्याख्यातुं शक्यते। भूतसङ्ख्याविधानम् आदौ अस्मिन् शास्त्रे एव सुष्ठु निरूपितं वर्तते इति वक्तुं शक्यते। संज्ञासूत्ररूपेण तृतीये शताब्दौ विरचितानि इमानि सूत्राणि पाणिनीयसूत्रैः साम्यं भजन्ते। ग्लिति समानी इति पञ्चमे अध्याये विद्यमानं षष्ठं सूत्रमपि विशिष्टं वर्तते।

एवमेव आर्यावृत्तस्य लक्षणमात्रं सूत्रं न प्रतिपादयति। एवं भारतीयज्ञानपरम्परायाः वैशिष्ट्यम् अद्वितीयतां च छन्दःसूत्राणि प्रतिपादयन्ति। वेदाङ्गानि अपि वैज्ञानिकदृष्ट्या अनुसन्धातुं शक्यन्ते।

शुभं भवतु शोधच्छात्राणाम्।




**आचार्यः के. रामसुब्रह्मण्यन्**

CISTS, IIT Bombay

# भारतीयज्ञानपरम्परायाः मूलं संस्कृतम्




गुरुकुलेषु शास्त्रमात्रम् अध्यापयन्ति स्म इत्येषः भ्रमः एव। बोधयानः बीजगणितस्य आविष्कारकः। आर्यभटस्य अष्टाङ्गपद्धतिम् आश्रित्य पाठ्यक्रमं रचयन्तु इति विश्वविद्यालयानुदानायोगोऽपि वारं वारं वदति। भरद्वाजस्य यन्त्रसर्वस्वं पाठ्यक्रमे पुरा आसीत्। अधुना न गुरुकुलेषु न वा विश्वविश्वद्यालयेषु दृश्यते। भारतीयज्ञानपरम्परायाः प्रचाराय एतादृशाः ग्रन्थाः पठनीयाः। कपिलमहर्षिः मनोवैज्ञानिकदृष्ट्या शास्त्रं प्रतिपादयति। भौतिकशास्त्रत्वेन अस्य ग्रन्थस्य बहुधा प्रसिद्धिः वर्तते। वराहमिहिरः न बोध्यते। नक्षत्रप्राणिशास्त्रम् इति ग्रन्थः कुत्र पाठ्यते ? न कुत्रापि। अतः एतादृशाः विभिन्नविषयविशेषोपेताः पाठ्यक्रमाः प्रारम्भणीयाः।

शोधच्छात्राः आयुर्वेदस्य जनकः कः ? धन्वन्तरेः योगदानं किम् ? इत्येतत् सर्वं गवेषयेयुः। सत्यं वद धर्मं चर इति वेदोपदेशस्य अध्ययनं शोधदृशा करणीयम्। विश्वगुरुः भवितुं केवलम् अध्ययनं पर्याप्तं नास्ति। तुलना अपि करणीया। लेखः भिन्नः शोधः भिन्नः। शोधच्छात्राः लेखान् न लिखेयुः। संशोधितस्य सारमात्रं लिखेयुः।

**विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्।**

**निर्णयश्चेति पञ्चाङ्गं सूत्रेऽधिकरणं विदुः॥**

इत्येतत् शैक्षिकानुसन्धानस्य अपि लक्षणमपि भवितुमर्हति। अध्येयमिदं शिक्षाशास्त्रिभिरपि । सर्वशास्त्राणाम् अपि मूलं भारतीयज्ञानप्रणाली एव । कुमारिलभट्टैः Five steps of Research उक्तमेव वर्तते।




**आचार्यः रमेशप्रसादपाठकः**

विभागाध्यक्षः , शिक्षाशास्त्रविभागः

LBS-NSU , दिल्ली

## Understanding Social issues, Cultural Heritage and Human Behaviour through Empirical Research



शैक्षणिक गुणोत्कर्ष कार्यशाला के अन्तर्गत चतुर्थ दिवस के तृतीय सत्र में डॉ. पारुल सिंह जी ने आनुभविक अनुसन्धान (Empirical Research) के बारे में शोधच्छात्रों को विविध समूहों में विभक्त करके प्रयोग के माध्यम से मानव के व्यवहार को परिभाषित किया। माननीय कुलपति श्रीनिवास वरखेडी जी ने अपने वक्तव्य में कहा था कि शिक्षा केवल अध्ययन नही है , अपितु अध्ययन के साथ-साथ प्रायोगिक रूप भी है। इस वक्तव्य को यथार्थ सिद्ध करते हुए डॉ. पारुल जी ने शोधच्छात्रों का अनेक दृष्टान्तों के माध्यम से शोध के बारे में मार्गदर्शन किया। शोध में चुनौती के अनेक प्रकारों को दर्शाते हुए उनके महत्वों को प्रतिपादित किया। गोपनीयता, विश्वसनीयता शोध का एक महत्त्वपूर्ण हिस्सा एवं समाज स्वयं को देखने का एक दर्पण है, इत्यादि सामाजिक प्रवृत्तियों को समझाते हुए उद्देश्यपूर्ण शोध के बारे में क्रिया केन्द्रित व्याख्यान के माध्यम से प्रेरित किया।

इस अवसर पर कार्यशाला संयोजक डॉ. गणेश ति. पण्डित जी केन्द्रीय संस्कृत विश्वविद्यालय एवं दिल्ली के विविध विश्वविद्यालयों के शोधच्छात्र उपस्थित रहे ।





**Dr. Parul Singh**

Asst. Professor, DEPFE

NCERT, Delhi

# प्रातिभासिकं व्याख्यानम्

## शोधकार्यं पराक्रमसाध्यम्



यस्मिन् विषये शोधकार्यं कुर्वन्ति तस्मिन् विषये रुचिमन्तः भवन्तु। संस्कृतवाग्व्यवहाराभावात् भाषायां गतिः अद्यत्वे न दृश्यते। अतः संस्कृतभाषाभ्यासः सर्वैः कर्तव्यः। श्रद्धया रुचिः वर्धते। रुचिमद्भिः वीरैः विशिष्टं कार्यं सम्पादयितुं शक्यते। व्याकरणे ज्ञानम् अत्यन्तम् आवश्यकम्। सूत्रकार -वार्तिककार- भाष्यकार-टीकाकाराणां च मतानि ज्ञातव्यानि। मातृकाः गवेषणीयाः। इंग्लंड देशस्य कपाटिकासु अद्यापि सहस्राधिकाः मातृकाः सन्ति। पराक्रमेण विदेशेषु विद्यमानाः मातृकाः स्वायत्तीकर्तव्याः सन्ति।

**आचार्यः विजयपालशास्त्री**

संयोजकः , शोधकेन्द्रम्

रघुनाथकीर्तिपरिसरः, देवप्रयागः